Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## ।। अनुक्रमणिका ।।


| अधिकारः | विषयः | पृष्ठम् |
|---|---|---|
| १ | बिम्बप्रतिष्ठावर्णनम् | १–१३ |
| २ | पार्श्वस्थवन्दनादिप्रतिपादनम् | १३–१८ |
| ३ | पाक्षिकविचारः | १८–२२ |
| ४ | वन्दनकत्रयविचारः | २२–२५ |
| ५ | आर्यिकानन्दिवक्तव्यता | २२–२६ |
| ६ | दाननिषेधविचारवर्णनम् | २६–२८ |
| ७ | माघमालाप्रतिपादनम् | २८–३१ |
| ८ | चतुर्विंशतिपट्टकादिविचारः | ३१–३४ |
| ९ | अविधिकरणविचारणा | ३४–३५ |
| १० | सिद्धबलिविचारणा | ३५–३६ |
| ११ | पार्श्वस्थादिसमीपे श्रवणादिविचारः | ३६–३७ |
| १२ | विधिचैत्यकरणवर्णना | ३८–४२ |
| १३ | दर्शनप्रभावकाचार्यविचारः | ४२–४४ |
| १४ | संघविचारः | ४४–४६ |
| १५ | पार्श्वस्थाद्यनुवर्तना | ४६–४८ |
| १६ | ज्ञानाद्यवज्ञाविचारः | ४८–४९ |
| १७-१८ | गच्छ–गुरुवचनात्यागविचारौ | ४९–५० |
| १९ | ब्रह्मशान्त्यादिपूजाविचारः | ५०–५३ |
| २० | श्रावकसिद्धान्तगाथापाठनविचारः | ५३–५६ |
| २१ | स्कन्धचटितविहारवर्णनम् | ५६–५८ |
| २२ | मासकल्पविचारः | ५८–६४ अ |
| २३ | सूरिमलधारणविचारः | अ ६४–६४ क |
| २४ | केवलस्त्रीव्याख्यानम् | क ६४–६५ |
| २५ | श्रावकाणां पार्श्वस्थादिवन्दनविचारः | ६५–७० |
| २६ | श्रावकसेवाविचारः | ७०–७१ |
| २७ | आर्यिकाधर्मकथनम् | ७१–७३ |
| २८ | जिनद्रव्योत्पादनवर्णनम् | ७३–७७ |
| २९ | अशुद्धग्रहणकथनम् | ७७–८३ |
| ३० | पार्श्वस्थादिसमीपेकृततपोनिन्दापनविचारः | ८३–८६ |
| ३१ | पार्श्वस्थादिकृतजिनभवने पूजाविचारः | ८६–८९ |
| ३२ | यो यथावादं न करोति स मिथ्यादृष्टिरिति विचारः | ८९–९४ |
| ३३ | वेषोऽप्रमाणमिति कथनविचारः | ९४–९७ |
| ३४ | असंयतशब्दविचारः | ९७–१०१ |
| ३५ | प्राणिवधदानवर्णनम् | १०१–१०७ |
| ३६ | चारित्रसत्ताविचारः | १०७–१०९ |
| ३७ | आचरणावर्णनम् | १०९–१११ |
| ३८ | गुणस्तुतिविचारः | १११–११३ |
| | उपसंहार–प्रशस्ती | ११३–११८ |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ अर्हम्

श्रीदेवसूरिविरचित—

# जीवानुशासनं

स्वोपज्ञटीकासहितम् ॥

अल्पश्रुतमतिसम्मतमतकरिकुम्भस्थलैककेसरिणं ।
वीरं नत्वा जीवानुशासनं किमपि विवृणोमि ॥ १ ॥

तत्र तावदभीष्टदेवतानमस्कारार्थं अभिधेयादिप्रतिपादनार्थं च प्रकरणस्य प्रकरणकारो हेतुगर्भामिमामादौ गाथामाह—

निम्महियरायरोसं वीरं नमिऊण भुवणतियबंधुं ।
मज्झत्थभावणाए जीवस्सणुसासणं वोच्छं ॥ १ ॥

वीरं नत्वा जीवानुसासनं वक्ष्य इति संटङ्कः । अवयवार्थस्त्वयम्– 'निर्मथितरागरोषं ' निराकृतप्रीतिद्वेषं ' वीरं ' वर्त्तमानतीर्थाधिपतिं ' नत्वा ' प्रणम्य, किं विशिष्टं ? 'भुवनत्रिकबन्धुं' जगत्रयबान्धवं, 'माध्यस्थ्यभावनया' रागद्वेषाभावेन 'जीवस्य' आत्मनः जातिनिर्देशाद्वा जीवस्य भव्यप्राणिगणस्य, एवमग्रेऽपि जीवामन्त्रणे ज्ञातव्यम्, अनुशासनं–शिक्षां, अत्र च " स्वराणां स्वरे प्रकृतिलोपसन्धयः । " इति प्राकृतलक्षणेन अकारलोपे अनुशब्दाकारस्य स्वरत्वे च रूपमिदम्, एवमन्यत्रापि यथासंभवं ज्ञेयमिति, 'वक्ष्ये' अभिधास्ये । शब्दव्युत्पत्त्यादिचर्चस्तु सर्वत्र सुकर एवेति न प्रतन्यते । अत्र च पूर्वार्धेनाभीष्टदेवतानमस्कारः प्रतिपादितः, तृतीयपादेन च हेतुगर्भत्वं प्रकटितं, तुर्यपादेन त्वभिधेयं प्रकाशितं, सम्बन्धस्तु स्वत एव वाच्यवाचकभावादिः प्रतिपादनीयः । प्रयोजनं तु कर्तृश्रोत्रोरनन्तरपरम्परभेदाद् द्विधा, तत्र कर्तुरनन्तरं कुमतनिराकरणेन सन्मार्गावतारात् भव्योपकारः, श्रोतुश्च यथावस्थितानेकशास्त्रप्रतिपादितार्थप्रतिपादकप्रस्तुतप्रकरणार्थज्ञानम्; परम्परं तु यथावस्थितकथनज्ञानाभ्यां सम्यक्क्रियात उभयोरपि परमपदप्राप्तिरेवेति । ननु अन्येष्वपि विशेषणेषु विद्यमानेषु भगवतः

For Private And Personal Use Only

" नणु मुणिवेसच्छन्ने निस्सीले वि मुणिबुद्धीए दिंतो।
पावइ मुणिदाणफलं तह किन्न कुलिंगदायावि ॥ "

आचार्यः—

" जं थाणं मुणिलिंगं गुणेण मुन्नंति तेण पडिमव्व ।
पुज्जं थाणमइएवि कुलिंगं सव्वहाजुत्तं ॥

परः प्राह—

नणु केवलं कुलिंगेवि होइ तं भावलिंगओवि-(आचार्य) न तओ ।
मुणिलिंगमंगभावं भवेज्जाइ जओ तेण तं पुज्जं ॥

एवं स्थिते जीवस्योपदेशमाह—

तित्थयरदंसणोवारि जइ जीव तुहत्थि निच्चला भत्ती ।
मुद्धाण सावयाणं ता मा लाएसु कुग्गाहं ॥ १७६ ॥

व्याख्या—तीर्थकरदर्शनोपरि सर्व्वज्ञप्रवचनोपरिष्टात् यदि जीव तवास्ति निश्चला दृढा भक्तिरास्तिक्यं मुग्धानामृजुमतीनां तस्मान्मेति निषेधे 'लाएसु' विलगय सम्बन्धय कुग्राहं कुत्सितबोधं 'श्रावकैः पार्श्वस्थादयो न वन्द्या' एवंरूपं पूर्व्वसाध्वपेक्षया मुख्यतो वन्दनं भणितमुक्तम्। अत्र तु श्रावकापेक्षयेत्यपौनरुक्त्यमिति गाथार्थः ॥

श्रावकाणां पार्श्वस्थादिवन्दनविचारः पञ्चविंशोऽधिकारः ॥

विग्गहविवायकज्जे अन्ने भिच्चव्व सावयजणस्स ।
निच्चं च्चिय ओलग्गं कुणंति नेयं वियाणंति ॥ १७७ ॥

व्याख्या—विग्रहविवादकार्ये, तत्र विग्रहो विरोधो विवादो वाक्कलहः, तन्निमित्तमन्येऽपरे भृत्या इव पदातय इव श्रावकजनस्य महर्द्धिकश्राद्धलोकस्य, उपलक्षणत्वात् भृत्यादीनांच नित्यमेव सर्वदा 'उलग्गं' ति सेवां कुर्व्वन्ति विदधति नो नैवेदं च वक्ष्यमाणं विजानन्ति बुध्यन्ते इति गाथार्थः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्विहारिभावितानां ते हि एवं कथयन्ति-"श्रावकैः साधुभ्यः सर्वथा दातव्यम्, तैस्तु यथारुचितं ग्राह्यं, यथा लुब्धका मृगव्यां गता मृगवधार्थं चेष्टन्ते हरिणास्तु तत्परिहारेण"इति, चः समुच्चये, मुक्त्वा परिहृत्य क्षेत्रकालं पूर्वोक्तार्थं, भावं ग्लानादिकं, चः समुच्चये, कथयन्ति-प्रतिपादयन्ति, शुद्धोञ्छं आधाकर्माद्यदूषितं, अयमाशयः-यदा क्षेत्रकालभावकारणानि तथाविधानि तदा शुद्धस्य वार्तापि न कथ्यते, अन्यथा विवक्षितद्रव्याभावतो निर्वाह एव न स्यात् तदभावे तु शरीराभावः तदभावे च संयमाभाव इति गाथार्थः ॥

पराभिप्रायमाशंक्याह—

बिंति जइ केइ तिविहं तिविहेणं पच्चक्खाणभंगो ।
तम्मयमोसारिज्जइ इमाए गाहाए अवियप्पं ॥२०७॥

व्याख्या- ब्रुवते गदन्ति यदि केऽप्येके त्रिविधं त्रिविधेन मनःप्रभृतिकरणादिना प्रत्याख्यानभंगो विरत्यभावोऽत्राशुद्धग्रहणे तन्मतं तद्वाद्यभिप्रायोऽपसार्यते निराक्रियते अनया वक्ष्यमाणया गाथया छन्दोविशेषेणाविकल्पं निस्सन्देहमिति गाथार्थः ।

तामेवाह——

सव्वत्थ संजमं संजमाउ अप्पाणमेव रक्खिज्जा ॥
मुच्चइ अइवायाओ पुणो वि सोही न या विरई ॥२०८॥

सुबोधा ॥

ननु भवद्भिरपवादपदानि दर्श्यन्ते, उत्सर्गस्य वार्ताऽपि न दृष्टा इत्याह——

जे उ जियसंसए वि हु चडंति न घडंति गहियसुत्तत्था ।
बीयपए धन्न च्चिय ते मुणिणो सव्वगुणनिहिणो ॥२०९॥

व्याख्या-ये पुनः जीवितव्यसंशयेऽपि-प्राणसन्देहेऽपि,हुः पूरणे,चटन्ति-आरोहन्ति, न नैव घटन्ते--युज्यन्ते घटितसूत्रार्थाः सम्बद्धवचनाभिधेयाः, द्वितीयपदे अपवादाख्ये, धन्या एव--पुण्यभाजस्ते उत्सर्गप्रिया मुनयः साधवः सर्वगुणनिश्रयो--निःशेषगुणनिधानम्; एते चाधाकर्माद्यपेक्षया इत्थं वाच्यं न पुनः पार्श्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थादिवन्दनापेक्षया, यतः कारणात्, तत्करणे प्रवचनभक्तिः, अकरणे चाभक्तिः निर्ज्जराश्रुतलाभौ च भणितौ ते न स्युरिति गाथार्थः ॥

इत्यमवबुद्ध जीवोपदेशमाह—

तम्हा मेवं देससु संससु परमत्थजाणए पुरिसे ।
जेणं जायइ तुज्झ वि समत्थ–परमत्थ–विन्नाणं ॥२१०॥

व्याख्या–तस्माद् मा निषेधे, एवमशुद्धं सर्व्वदा प्रतिषिद्धमिति दिश कथय, संश्लाघय, परमार्थज्ञान् तत्त्ववित्पुरुषान् सूरिप्रभृतीन्, येन जायते सम्पद्यते तवापि भवतो 'जीव ! ' इति शेषः, न केवलमाचार्यादीनामित्यप्यर्थः, समस्तपरमार्थविज्ञानं–निश्शेषतत्त्वावगम इति गाथार्थः ॥

अशुद्धग्रहणकथन एकोनत्रिंशोऽधिकारः ॥

त्रिंशत्तममाह—

पासत्थाइसमीवे तवो विहाणाइ जं कयं तं तु ॥
निंदाविंति य केई कसायवसकलुसियप्पाणो ॥ २११ ॥

व्याख्या–पार्श्वस्थादिसमीपे–शिथिलादिनिकटे तपो–विधानादि उपवासपठनप्रभृति, यद्–अनिर्दिष्टनामकम्, कृतं–विहितम्, तत्पुनरुपवासादि निन्दापयन्ति त्याजयन्ति, केऽप्येके, कषायावेशकलुषितात्मानः–कोपावेशमलिनीकृतस्वरूपाः, इति गाथार्थः ॥

तत्रोत्तरमाह—

तं न जम्हा ववहारओ उ लट्ठाओ जायए लट्ठं ॥
निच्छयओ पुण नेवं ववहारम्मी जओ भणियं ॥ २१२ ॥

व्याख्या–तत्–परोक्तम्, नेति निषेधे, यस्माद् व्यवहारत एव–व्यवहारनयमतेन, तुरवधारणे, लष्टात्–शोभनात् साध्वादेः, जायते भवति, लष्टं–शोभनं कर्म्म निर्ज्जरणादि, निश्चयतः पुनर्निश्चयमतेन, नेति निषेधे, एवमित्थं, व्यवहारे–प्रतीते, यतो भणितमुक्तम्, इति गाथार्थः ॥

For Private And Personal Use Only

